हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः वैशाखशुक्लनवमी
वैशाख 23 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-187 | 1 | मई 06, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HP Cabinet Decisions: अंशकालिकाः भविष्यन्ति दैनिकभोगिनः,नवनियुक्तिभ्यः मानकनिर्देशाः

3 HP Biosphere Reserve: स्पीति-उपत्यकाः यूनेस्को बायोस्फीयर रिज़र्व रूपेण स्वीकृता भविष्यति, वनविभागेन प्रस्तावः प्रेषितः

4 1008 सङ्ख्यकानां संस्कृत-सम्भाषण- शिविराणां समापनसन्धौ उत्तरप्रदेश- संस्कृतसंस्थानाय विशेषसम्माननं प्राप्तम्

## सुभाषितम्

**धर्मेण हि जीवनं,**
**पावनं क्लेशरहितम्।**
**अनर्थपथेन गन्ता,**
**दुःखसागरम् अनुभवति॥**

भावार्थः- धर्म के मार्ग पर जीवन पवित्र और क्लेशरहित होता है, अनर्थ के मार्ग पर जाने वाला दुःख का सागर अनुभव करता है।

## भारतेन चिनाब नद्याः बगलिहार-जलबन्धेन जलस्य प्रवाहः निरुद्धः



हिमसंस्कृतवार्ताः - पहलगाम-आतङ्कवादी-आक्रमणस्य पश्चात् पाकिस्तान-विरुद्धम् अपरस्मिन् सशक्त-पदे भारतेन चिनाब नद्याः बगलिहार-जलबन्धेन जलस्य प्रवाहः निरुद्धः अस्ति। प्राप्तवार्तानुसारं भारतेन सिन्धुनदीभ्यः समीपस्थदेशं प्रति "एकबिन्दुरपि जलं" गन्तुं नानुमन्यते इति निर्णयं अनुसृत्य, बगलीहारजलबन्धात् पाकिस्तानं प्रति जलप्रवाहम् अवरुद्धः। भारतेन अधुना झेलम नद्याः किशनगङ्गा-जलबन्धे अपि एतादृशानाम् उपायानां योजना क्रियते । अवधेयमस्ति यत् जम्मू-सम्भागस्य रामबन-मण्डले स्थितः बगलीहार-जलविद्युत्-बन्धः, उत्तर-कश्मीरे किशनगङ्गा-जलविद्युत्-बन्धः भारताय जल-विमोचन-समय-नियमनस्य क्षमताम् यच्छतः।

## रक्षामन्त्री राजनाथसिंहः नवदिल्लीनगरे जपानदेशस्य समकक्षीयेन जनरल् नकाटानी इत्यनेन सह द्विपक्षीय-समागमं कृतवान्



हिमसंस्कृतवार्ताः - रक्षामन्त्री राजनाथसिंहः सम्प्रति नवदिल्लीनगरे स्वस्य जपानदेशस्य समकक्षीयेन जनरल् नकाटानी इत्यनेन सह द्विपक्षीयसमागमं करोति । श्रीराजनाथसिंहः स्वस्य उद्घाटनभाषणे पहलगाम-आतङ्कवादी आक्रमणस्यालोके भारतेन सह एकस्वरेण दृढाभिव्यक्तये जापान-सर्वकाराय धन्यवादं दत्तवान्। भारत-जापान-रक्षासम्बन्धस्य सुदृढीकरणाय जनरल् नकाटानी इत्यस्य अपार-योगदानस्य प्रशंसाम् अपि अकरोत् । उभयपक्षः वर्तमानक्षेत्रीय-अन्ताराष्ट्रिय-सुरक्षा-स्थितेः विषये विचाराणाम् आदान-प्रदानं कुर्वन् अस्ति, द्विपक्षीय-रक्षा-सहकार्यं अधिकं गभीरं कर्तुं च उपायानपि चर्चितवन्तौ

## रशियादेशस्य राष्ट्रपतिः व्लादिमीर् पुतिनः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं कृतवान्



हिमसंस्कृतवार्ताः - रशिया राष्ट्रपतिः व्लादिमीर् पुतिनः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं कृत्वा भारतस्य पहलगाम् इत्यत्र आतङ्कवादीनां आक्रमणस्य कठोरनिन्दां कृतवान्। दूरभाषेण वार्तालापकाले राष्ट्रपतिना पुतिनेन निर्दोषाणां प्राणहानिविषये गभीराः शोकसंवेदनाः प्रकटिताः तथा, आतङ्कवाद-विरुद्ध-युद्धे भारतस्य पूर्णसमर्थनं च प्रकटितम्। सः जघन्यस्य आक्रमणस्य अपराधिनः, तेषां समर्थकाः च न्यायालये आनेतव्याः इत्यवोचत्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः सामाजिकमाध्यम-पटले अलिखत् यत् वार्तालापकाले उभौ नेतारौ भारतस्य रशियादेशस्य च मध्ये विशेषाधिकारयुक्त सामरिक सहयोगम्, अधिकं गभीरं कर्तुं स्वप्रतिबद्धतां पुनरुक्तवन्तौ । प्रधानमन्त्री मोदी, अशीतितमं वार्षिक-विजयदिवसमुद्दिश्य राष्ट्रपतिपुतिन् इत्यस्मै अभिनन्दनं कृतवान् तथा च इतःपरं भारते आयोजयिष्यमाणा-वार्षिकशिखरसम्मेलनाय आमन्त्रितवान्।

## NET परीक्षायै

### आमन्त्रितानि आवेदनानि

हिमसंस्कृतवार्ताः। विश्वविद्यालय-अनुदानायोगेन NTA इत्यनेन च (NET ) राष्ट्रियपात्रता परीक्षायै आमन्त्रितानि आवेदनानि। आवेदनस्य अन्तिमा तिथिः मई मासस्य ८ दिनाङ्को वर्तते। ९ मई दिनाङ्कपर्यन्तञ्च आवश्यकसंशोधनानि कर्तुं शक्यन्ते।

## सर्वोच्चन्यायालयेन वक्फसंशोधन अधिनियमस्य अग्रिमश्रवणार्थं मईमासस्य पञ्चदशदिनांकं निर्धारितम्



हिमसंस्कृतवार्ताः - सर्वोच्चन्यायालयेन ऐषमः वक्फ संशोधन अधिनियमस्य, संवैधानिक-वैधतायाः सम्बद्धं प्रकरणं मई पञ्चदश-दिनाङ्के अग्रिमश्रवणार्थं सूचीबद्धम् कृतमस्ति। अवधेयमस्ति यत् भारतस्य मुख्यन्यायाधीशः संजीव खन्ना, न्यायाधीशः संजयकुमारः, न्यायाधीशः के. वी. विश्वनाथनः इत्येतैः सम्मिलितेन संविधानपीठेन अस्य वक्फ अधिनियमस्य संवैधानिकवैधतां विरुद्ध्य कृत-याचिकानां समूहस्य श्रवणं क्रियते स्म । श्रवणकाले मुख्यन्यायाधीशः खन्ना अवदत् यत् - पीठेन प्रतिशपथपत्रं प्रति बहुगभीरेण नाभिगता। तेनोक्तं यत् सः एतत् विषयं अग्रिमस्य मुख्यन्यायाधीशस्य न्यायाधीश-भूषणरामकृष्ण गवई इत्यस्य पीठे स्थापयिष्यति, यश्च मई चतुर्दश-दिनाङ्के कार्यभारं स्वीकुर्यात्। खन्ना-वर्येण उक्तं यत् सः न्यायाधीश-गवई इत्यस्मै विषय-प्रवेशाय किञ्चित् समयं दातुम् इच्छति।

## भारतीय-ऋतु-विज्ञानविभागेन आगामिदिनत्रयपर्यन्तं

### नारङ्गवर्णीयसंचेतना प्रसारिता

हिमसंस्कृतवार्ताः - भारतीय-ऋतु-विज्ञानविभागेन आगामिदिनत्रयपर्यन्तं वज्रपातस्य, झञ्झावातस्य च नारङ्गवर्णीयसंचेतना प्रसारिता। विभागेन गुरुवासरपर्यन्तं ओडिशा-पश्चिमबङ्ग-झारखण्डयोः उपरि वज्रपातः, विद्युत्-वायुः, झञ्झावातश्च भविष्यतीत्यपि पूर्वानुमानं कृतम् । दक्षिणभारते अपि सम्पूर्णसप्ताहं यावत् एतादृशी स्थितिः अपेक्षिता अस्ति।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## रक्षासचिवः राजेशकुमारसिंहः प्रधानमन्त्रिणं मिलितवान्



हिमसंस्कृतवार्ताः - पहलगाम-आतंकि-आक्रमणस्यालोके रक्षासचिवः राजेशकुमारसिंहः प्रधानमन्त्रिणं श्रीनरेन्द्रमोदिनं नवदिल्लीनगरस्य तस्य निवासस्थाने मिलितवान् । अवधेयमस्ति यत् वायुसेनाप्रमुखः एयर चीफ मार्शल अमरप्रीतसिंहः श्रीमोदिना सह मिलितवान् आसीत्। प्रधानमन्त्रिणः एड्मिरल् दिनेश-के-त्रिपाठी इति नौसेनाप्रमुखस्य तथा भूसेनाप्रमुखस्य जनरल उपेन्द्र द्विवेदी इत्याभ्यां सहापि पृथक् पृथक् सभाः अभवन्।

# HP Cabinet Decisions:अंशकालिकाः भविष्यन्ति दैनिकभोगिनः,नवनियुक्तिभ्यः मानकनिर्देशाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशमन्त्रिमण्डलस्य गोष्ठी सोमवासरे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां सम्पन्ना। सभायां बहवः महत्त्वपूर्णाः निर्णयाः कृताः। राज्यमन्त्रिमण्डलस्य सत्रे विभिन्नविभागेषु कार्यं कुर्वन्तः चतुर्थश्रेण्याः अंशकालिककर्मचारिणः, ये च ३१ मार्च २०२५ पर्यन्तं सप्तवर्षपर्यन्तं निरन्तरसेवां सम्पन्नां कृतवन्तः, तेषां दैनिकवेतनप्राप्तिषु परिवर्तनं कर्तुं निर्णयः कृतः अस्य लाभं प्रायः अष्टसहस्रेभ्यः अंशकालिककार्यकर्तृभ्यः भविष्यति। सभायां वनविभागस्य वन्यजीवविभागं शिमलातः जिलाकाङ्गड़ायां धर्मशालायां स्थितं सीपीडी केएफडब्ल्यू परियोजनाकार्यालयभवनं प्रति स्थानान्तरयितुम् अनुमोदनं दत्तम्। एतेन सह सीपीडी केएफडब्ल्यू परियोजनाकार्यालयं वनपरिधिपदाधिकारिणः (वन्यजीवं) धर्मशालायाः रिक्तभवने स्थानान्तरयितुं निर्णयः कृतः।

## मण्डी जिलाकारागारं नेरचौकं स्थानान्तरितं भविष्यति

मन्त्रिमण्डलस्य सत्रे मण्डीतः नेरचौकः इत्यत्र नवनिर्मितभवनं प्रति जिलाकारागारं स्थानान्तरयितुम् अनुमोदनं दत्तम्। मण्डीनगरे वर्तमानं कारागारसङ्कुलं महिलानां कृते मुक्तकारागारे परिणमयिष्यते। अस्य कारागारस्य सुचारुरूपेण कार्यानुष्ठानार्थं विविधवर्गस्य आवश्यकपदानि निर्माय पूरयितुं च अनुमोदनं दत्तम्। गोष्ठ्यां राजस्वविभागस्य अन्तर्गतं हिमाचलप्रदेशस्य ऑनलाइन- फाइलिंग एवं प्रोसेसिंग ऑफ़ कोर्टकेस नियम- 2025 इत्यस्य अनुमोदनं जातम्। एतेषां नियमानाम् अन्तर्गतं राजस्वन्यायालयाः आवेदनपत्राणि, प्रार्थनां, संशोधनं, समीक्षाम्, अन्यां याचिकां च ऑनलाइन प्राप्तुं, प्रक्रियां च कर्तुं शक्नुवन्ति।

चयनायोगस्य नियुक्तिपरीक्षाणां शुल्कनिर्धारणस्य अनुमोदनम्परीक्षाशुल्कनिर्धारणाय हिमाचलप्रदेश-राज्य- चयन- आयोगाय अधिकारं दातुं मन्त्रिमण्डलेन अनुमोदनं कृतम्। राष्ट्रिय- राजमार्गसमीपस्थेषु क्षेत्रेषु अनियंत्रितनिर्माणम्, अव्यवस्थितं व्यापारविकासं च निवारयितुम् ऊनामण्डले चिन्तपूर्णी, शिमलामण्डले सराहानविशेषक्षेत्रं, हमीरपुरमण्डले भोटानियोजनक्षेत्रं च विकासयोजनाः सज्जीकर्तुं मन्त्रिमण्डलेन निर्णयः कृतः।

## भाविनियुक्तीनां पक्षेषु विचारं कर्तुं मन्त्रिमण्डलस्य उपसमितिः

मन्त्रिमण्डलेन विभिन्नेषु सर्वकारीयविभागेषु (यत्र आग्रहप्रक्रिया सम्पन्ना अस्ति) रिक्तस्थानानां आग्रहः, चयनप्रक्रिया, नियुक्तिप्रस्तावः च इति विषये नूतनानां मार्गदर्शिकानाम् अनुमोदनं कृतम्। भविष्ये नियुक्तीनां पक्षेषु विचारार्थं मन्त्रिमण्डलस्य उपसमित्याः सङ्घटनस्य निर्णयः अभवत्। मन्त्रिमण्डलस्य निर्णयानां विषये सूचनां दत्त्वा मन्त्री हर्षवर्धनचौहानः अवदत् यत् कर्मचारीसेवाशर्तविधेयकः:- २०२४ कार्यान्वयनानन्तरं राज्ये अनुबन्धनियुक्तिः स्थगिता अस्ति। परन्तु अत्रान्तरे अनेकेषां पदानां साक्षात्कारः कृतः अथवा अनेकेषां कृते चयनविज्ञापनं प्रकाशितम् अस्ति। एतादृश्यां परिस्थितौ एतासु नियुक्तिषु चयनिताः अभ्यर्थिनः वर्षद्वयं यावत् प्रशिक्षुकर्मचारिणः प्रशिक्षुपदाधिकारिणः वा नियुक्ताः भविष्यन्ति। वर्षद्वयानन्तरं सेवानां नियमितीकरणं भविष्यति।

## निजीसञ्चालकाः ३५० नवीनमञ्चवाहन-मार्गेषु टेम्पोयात्रिकान् चालयिष्यन्ति

सार्वजनिकयानसेवानां वर्धनार्थं, संपर्कस्य उन्नयनार्थं च सर्वकारेण स्थानीययाचनायाः आधारेण नूतनैः अतिरिक्तमार्गैः सह निजीसञ्चालकानां कृते १८ आसनयुक्तः टेम्पो ट्रैवलरस्य संचालनार्थं राज्ये ३५० नवीनमञ्चवाहनमार्गस्य आबंटनस्य अपि अनुमोदनं कृतम्।

## चिकित्साधिकारीणां ८१ पदानां पूर्त्यर्थं स्वीकृतिः

मन्त्रिमण्डलेन ८१ चिकित्सापदाधिकारिणां पदानि पूरयितुम् अनुमोदनं कृतम् यत्र ६८ अपघात- चिकित्सा-पदाधिकारिणः, १३ विभिन्नवर्गस्य पदानि च सन्ति। सर्वकारीय- चिकित्सामहाविद्यालयेषु चिकित्सासंस्थासु च आपत्कालीनसेवाः, आघातकेन्द्राणि, दुर्घटना- एककाः, रक्तसंग्रहणकोषाः, तृतीयक- कर्क्कट-सेवा-सुविधाः च सुदृढाः कर्तुं दृष्ट्या एषः निर्णयः कृतः अस्ति तदतिरिक्तं कृषिविस्तारसेवानां समर्थनार्थं विभिन्नेषु कृषिविज्ञानकेन्द्रेषु विषयविशेषज्ञानां ११ पदानां पूरणार्थं मन्त्रिमण्डलेन अनुमोदनं कृतम्। मन्त्रिमण्डलेन न्यायिकसेवाविभागे न्यायिकक्षमतावर्धनार्थं FACT तथा FACT Plus इत्येतयोः १८ योग्यव्यावसायिकानां नियुक्तेः अनुमोदनं कृतम्।

## छोटाशिमलायां १४, १७ तलयोः वाणिज्यिकसङ्कुलद्वयं निर्मितं भविष्यति

मन्त्रिमण्डलेन ग्रामीणशिमलानगरस्य मोहल्ला छोटाशिमलायां १४, १७ तलयोः भवनद्वयस्य वाणिज्यिकसङ्कुलनिर्माणस्य अनुमोदनं कृतम्। परियोजनायाः उद्देश्यम् आधुनिकसुविधाभिः, पर्याप्तयानस्थगनेन, नगरस्य वर्धमानानाम् प्रशासनिकव्यापारिकानाम् आवश्यकतानां पूर्तये इष्टतमरूपेण प्रारूपं कृतं विन्यासं च सुसज्जितं विश्वस्तरीयं आधारभूतसंरचनां निर्मातुं वर्तते मन्त्रिमण्डलेन १५ वित्तायोगस्य अन्तर्गतं पेयजलापूर्तियोजनानां निष्पादनार्थं परिपालनाय च पंचायतानां कृते जलशक्तिविभागं सेवाप्रदातृत्वेन नियुक्तम्।

## एम्स बिलासपुर इत्यस्मै भूमिस्थानांतरणस्य अनुमोदनम्

मन्त्रिमण्डलेन एम्सबिलासपुरस्य विस्तारार्थं मौजा चङ्गरपलासियां-क्षेत्रस्य २१-०९ बीघाभूमिं स्वास्थ्यपरिवारकल्याणमन्त्रालयस्य पक्षे चरण- ३, चरण-३ अन्तर्गत- विस्तारस्य अनुमोदनं कृतम्। चम्बामण्डलस्य राजस्वसम्पत् सरोलस्य ५२-१७-०० बीघाभूमिः भारतसर्वकारस्य शिक्षामन्त्रालयस्य विद्यालयशिक्षासाक्षरताविभागाय जवाहरनवोदयविद्यालयस्य संचालनार्थं स्थानान्तरणं च अनुमोदितवान्। शिमलामण्डले नगरपञ्चायतसुन्नीनां नगरपालिकापरिषदि उन्नयनसम्बद्धे पूर्वसूचनायाः निवृत्तेः अपि मन्त्रिमण्डलेन अनुमोदनं कृतम्।

# HP Tourism:- पर्यटकैः पुनः प्रफुल्लितानि पर्यटनस्थलानि, शिमलायाम् स्थित्यवस्था अष्टशतम् प्रतिशतपर्यन्तम् आगता



हिमसंस्कृतवार्ताः - डॉ पद्मनाभः। शिमला। उत्तरभारतात् आगतानां पर्यटकानां कारणेन हिमाचलप्रदेशस्य पर्यटनस्थलानि पर्यटकैः पुनः प्रफुल्लितानि। अस्मिन् सप्ताहान्ते शिमला, कसौली, चायल, मनाली, डल्हौजी इत्येषु स्थलेषु पर्यटकानां संख्या वर्धिता। शिमलायाः समीपस्थितेषु कुफरी-नारकण्डा-नाम्नोः स्थलयोः अपि स्थित्यवस्था (ऑक्यूपेंसी) अष्टशतम् प्रतिशतपर्यन्तम् प्राप्ता। कसौल्यामपि पर्यटकानां अपि दृष्टा। बहवः पर्यटकाः किन्नौरं प्रति अपि गच्छन्ति। यद्यपि काश्मीरे घटितायाः घटनायाः अनन्तरं दक्षिणभारतात् आगतानां पर्यटकानां संख्या न्यूनतमा जाता। १५ अप्रैलतः आरब्धे ग्रीष्मपर्यटनकालस्य द्वितीयसप्ताहात् अनन्तरं प्रदेशे पर्यटकानां संख्या शनैः शनैः वर्धमानम् आरब्धा। *"अखिल-हिमाचल-व्यावसायिक-यानसंयुक्तकार्यसमित्याः" अध्यक्षः राजेन्द्र ठाकुर इत्यनेन उक्तं यत् - "अस्मिन् सप्ताहान्ते कार्ये गतिं प्राप्तम्। समस्तेषु पर्यटनस्थलेषु पर्यटकानां संख्या वर्धिता।"*

*"पहलगामे घटितायाः घटनायाः अनन्तरं हिमाचले अपि पर्यटकानां आगमनं न्यूनम् अभवत्। किन्तु अस्मिन् सप्ताहान्ते पुनः पर्यटकाणां आगमनराशिः वर्धितुं प्रारब्धः।"*

**- गजेन्द्रचन्दठाकुरः, अध्यक्षः, "फेडरेशन ऑफ हिमाचल होटल एंड रेस्टोरेंट्स एसोसिएशन।"**

## केन्द्रीय-मार्गपरिवहन-राजमार्गमन्त्री-नितिनगडकरी तेलंगानाराज्ये बहुविध-मार्गपरियोजनानां आधारशिलाम् स्थापितवान्



हिमसंस्कृतवार्ताः - केन्द्रीय-मार्गपरिवहन-राजमार्गमन्त्री-नितिनगडकरी तेलंगानाराज्यस्य सिरपुर-कागजनगरे नवशतोत्तर-त्रिसहस्रम्, कोटिरूप्यकाणां बहुविध-मार्गपरियोजनानां आधारशिलाम् स्थापितवान् अथ बहुविधपरियोजनानि राष्ट्राय समर्पितवान् । अस्मिन् अवसरे वदन् श्री-गडकरी राज्ये मार्गसंरचनानां सुदृढीकरणाय केन्द्रस्य प्रतिबद्धतां पुनः पुष्टिं कृतवान् । मन्त्री अवदत् यत्, न्यू ग्रीन एक्सप्रेस् राजमार्गस्य इन्दौर-हैदराबाद-कारिडार् इति मार्गं आगामिवर्षस्य मार्चमासपर्यन्तं सम्पन्नः भविष्यति, तदनन्तरं सूरत-नासिक-कुर्नूल-हैदराबाद-चेन्नै-तिरुवनन्तपुरम् ग्रीनफील्ड् राजमार्गः अग्रिम-वर्षस्य अप्रैल-मासपर्यन्तं संपूर्णः भविष्यति।

## इण्डियनआइडल १२ इत्यस्य विजेता गायकः पवनदीपः मार्गदुर्घटनायां व्रणितः, गम्भीरा स्थितिः

हिमंसस्कृतवार्ताः,शिवाशर्मा। दूरदर्शनकार्यक्रमस्य इण्डियनआइडल १२ इत्यस्य विजेता गायकः पवनदीपः उत्तराखण्डतः नोएडानगरं गच्छन् मार्गदुर्घटनायां व्रणितो जातः। दुर्घटनायां तस्य कारयानचालकः राहुलसिंहः सहचरः अजयमेहरा च अपि व्रणितौ। पुलिसारक्षकैः त्रयः एव निजचिकित्सालये प्रवेशिताः। गायकस्य पवनदीपस्य स्थितिः गम्भीरा अस्ति। उत्तराखण्डस्य चम्पावतक्षेत्रस्य निवासी सुरेशराजनस्य आत्मजः पवनदीपः भारतीयगायनस्य "रियलिटीटीवीशो इण्डियन आइडल १२" इत्यस्य विजेता अस्ति। प्राप्तवार्तानुसारं रविवासरे रात्रौ पवनदीपः स्वमित्रेण "अजयमेहरा" इत्यनेन सह गृहात् नोएडानगरं गच्छन् आसीत्। तस्मिन् काले तस्य कारयानं चालकः राहुलसिंहः चालयति स्म। रात्रौ २.३० (सार्धद्विवादने) गजरौलापुलिसस्थानकक्षेत्रे चौपाला-क्रॉसिंग-उपरिसेतोः यदा तस्य वाहनम् अवतरत् तदा एव कैंटरयानेन सह पृष्ठतः घट्टनम् अभवत्। चालकस्य राहुलसिंहस्य निद्राकारणेन दुर्घटनेयम् अभवत् । दुर्घटनायां गायकः पवनदीपः, तस्य सहचरः अजयमेहरा, चालकः राहुलसिंहश्च गम्भीररूपेण व्रणिताः अभवन् ।

## HP Biosphere Reserve: स्पीति-उपत्यकाः यूनेस्को बायोस्फीयर रिज़र्व रूपेण स्वीकृता भविष्यति, वनविभागेन प्रस्तावः प्रेषितः



हिमसंस्कृतवार्ताः - डॉ पद्मनाभः ।शिमला। हिमाचलप्रदेशस्य स्पीति-उपत्यका मैन एण्ड बायोस्फीयर (मानव-मण्डलजीवमण्डलम्) कार्यक्रमे सम्मिलिता भविष्यति। अस्मिन कृते पर्यावरण-वन-जलवायुपरिवर्तन-मन्त्रालयस्य माध्यमेन वनविभागेन यूनेस्को-संस्थायै प्रस्तावः प्रेषितः। अस्मिन प्रस्तावे स्पीति-उपत्यकाः शीतमरुस्थलस्वरूपं तथा हिमवृकस्य (हिमव्याघ्रः) निवासस्थानं कारणरूपेण निर्दिष्टम्। एषः प्रदेशः भारतसर्वकारेण पूर्वमेव शीतमरुस्थल-बायोस्फीयर इति रूपेण नामांकितः अस्ति, किन्तु यूनेस्कोस्य एम.ए.बी. कार्यक्रमे सम्मिलितः नास्ति।
यदि यूनेस्को एतद् प्रस्तावं स्वीकरोति तर्हि हिमाचलप्रदेशः विश्वमानचित्रे नूतनं स्थानं प्राप्स्यति। एषः प्रदेशः अन्ताराष्ट्रीयमानदण्डानुसारं विकासं प्राप्स्यति। भिन्नप्रकारस्य भौगोलिकसंरचनायुक्तः एषः मैन एण्ड बायोस्फीयर रूपेण आरक्षितः भविष्यति। अनेन लाभः यः स्यात्—एषः प्रदेशः विश्वस्तरीयवित्तनिधिभिः सह सहायता प्राप्स्यति। स्पीति-उपत्यका अपि अद्वितीयं पर्यटनस्थलं रूपेण विकासं प्राप्स्यति। एवं सति हिमालयप्रदेशे वसतां जनानां कृते अपि लाभः भविष्यति। अस्मिन् प्रदेशे पर्यावरण-पर्यटनसम्बद्धाः क्रियाकलापाः स्थानिकजनानां कृते रोजगार-अवसरान् वर्धयिष्यन्ति।

### देशे अर्धदशाधिकाः बायोस्फीयर आरक्षिताः सन्ति

देशे वर्तमानसमये प्रायः षोडश बायोस्फीयर आरक्षिताः सन्ति। प्रमुखेषु बायोस्फीयर-आरक्षितेषु नीलगिरि बायोस्फीयर तमिळनाडु, केरल, कर्नाटकराज्येषु सन्ति। मन्नार-सागरस्य बायोस्फीयर तमिळनाडौ, सुन्दरबनं पश्चिमबङ्गालप्रदेशे, नन्दादेवी उत्तराखण्डे, पचमढ़ी मध्यप्रदेशे, सिमलिपाल ओडिशायाम्, अचानकमार-अमरकंटक मध्यप्रदेश-छत्तीसगढ़योः च, ग्रेट् निकोबार बायोस्फीयर अण्डमान्-निकोबारद्वीपसमूहेषु च वर्तन्ते।
यदि प्रस्तावः स्वीक्रियते तर्हि स्पीति-उपत्यका विशिष्टं विश्वस्तरस्थलं भविष्यति।
स्पीति-उपत्यका मैन एण्ड बायोस्फीयर कार्यक्रमे सम्मिलयितुं यूनेस्को-संस्थां प्रति प्रस्तावः कृतः। पर्यावरण-वन-जलवायुपरिवर्तन-मन्त्रालयस्य माध्यमेन एषः प्रस्तावः यूनेस्को-संस्थायै प्रेषितः। एषः प्रस्तावः यूनेस्कोसंस्थायाः समीक्षणे अस्ति इति मन्यते।
*— अमिताभ गौतम, प्रधानमुख्य-अरण्यपालः, वन्यप्राणी विभागः।*

## शिमला- प्रभावितकृषकेभ्यः उद्यानपालकेभ्यः नियमानुसारं क्षतिपूर्तिः दातव्या - कुलदीपराठौरः



हिमसंस्कृतवार्ताः - शिमला। अखिलभारतीयकाङ्ग्रेससमितेः प्रवक्ता तथा ठियोगविधायकः कुलदीपसिंहराठौरः मुख्यमन्त्रिणः, कृषिमन्त्रिणः, उद्यानमन्त्रिणः च आग्रहं कृतवान् यत् ते राज्ये अकृतुवृष्ट्या अश्मपातेन च नगदसस्यानां फलानां च क्षतेः आकलनं कृत्वा प्रभावितकृषकेभ्यः उद्यानपालकेभ्यः च नियमानुसारं क्षतिपूर्तिं प्रदातुं शक्नुवन्ति। सः अवदत् यत् राज्ये अश्मपातेन सेबसस्यं सर्वथा नष्टं जातम्, अन्येषु शाकगोधूम इत्यादीनां सस्यानां अपि महती हानिः अभवत्। सः अवदत् यत् राज्यस्य राजस्वविभागाय शीघ्रमेव एतस्य हानिः आकलनं कर्तुं निर्देशः दातव्यः।सोमवासरे पत्रकारैः सह वार्तालापं कुर्वन् कुलदीपसिंहराठौरः विगतवर्षद्वये राज्ये प्राकृतिकविपदः वृद्धिविषये चिन्ताम् व्यक्तवान्, अधुना अस्मिन् विषये वैज्ञानिकसंशोधनस्य आवश्यकता वर्तते इति च अवदत्। सः अवदत् यत् वैश्विकतापस्य वर्धनं अस्य प्रमुखं कारणं भवितुम् अर्हति। सः अवदत् यत् उद्यानस्य कृषेः च कृते दीर्घकालीननीतयः निर्मातव्याः, येन तेषां कस्यापि प्राकृतिकविपदः कारणेन आर्थिकहानिः भवितुं शक्यते। राठौरः उक्तवान् यत् शिमला-उपरि अनेकस्थानेषु अश्मपात-चक्रवातस्य निवारणाय अनेकेषु स्थानेषु ओला-विरोधी-भुशुण्डिकाः स्थापिताः सन्ति । केचन उद्यानपालकाः मन्यन्ते यत् अन्यत्र विपरीतप्रभावः भवति, अश्मवृष्टिः च स्वक्षेत्रं प्रति गच्छति । सः अवदत् यत् एतस्य कारणेन समीपस्थेषु क्षेत्रेषु अश्मपातस्य प्रतिमानं परिवर्तते वा इति अपि अन्वेषणस्य आवश्यकता वर्तते तथा च यदि न भवति तर्हि ठियोग क्षेत्रे अपि ओला-विरोधी-भुशुण्डिकाः स्थापनीयाः।

## लौकिकन्यायकोशः
### " *अग्र्यानन्यायः* "

अग्रिम् आहार इति कोऽपि वदति चेत् कस्मिन् अपि पात्रे अग्रिम् आहर इति वक्तव्यं न भवति। यः अग्रिम् आनयति सः योग्य पात्रं अन्विष्य तस्मिन् अग्निं स्थापयित्वा एव आनयति। एषा अपेक्षा आदेशस्य दातुः पालयितुः च भवति । एवम् आधारं विना आधेयं स्थातुं न प्रभवति इति द्योतयितुम् अस्य न्यायस्य प्रयोगः भवति।

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

## हास्यकणिका

यदि कोऽपि वदति यत् "भवान् सम्यक् न दृश्यते", तर्हि तान् वदतु, " यदि अहं सम्यक् न दृश्ये, तर्हि भवान् स्वस्य नेत्रे निमील्य मां मा पश्यतु" 🤣😅*
यदि कोऽपि वदि यत् "भवान् किमपि न कर्तुं शक्नोति", तर्हि " तया सह क्लेशं कृत्वा दर्शयतु भवान् क्लेशं सम्यक् रूपेण कर्तुं शक्नोति" 🤣😅* यदि पंडितः वदति, भवतः भाग्ये बहु धनम् अस्ति, तर्हि तया पंडितं पृच्छतु "भाग्ये यद् धनम् अस्ति, वित्तकोषे कथम् आगमिष्यति? " 🤣*




**डॉ.विदुषी अग्रवालः**

# 1008 सङ्ख्यकानां संस्कृत- सम्भाषण- शिविराणां समापनसन्धौ उत्तरप्रदेश- संस्कृतसंस्थानाय विशेषसम्माननं प्राप्तम्



*संस्कृतसंवर्धने उत्तरप्रदेशः अग्रगण्यः राज्यः जातः, योगीसर्वकारस्य नीतिः सफलतां प्राप्तवती*

**हिमसंस्कृतवार्ताः- लखनऊ/ नवदिल्ली,** संस्कृतभाषायाः प्रचारप्रसारपुनरुत्थानयोः क्षेत्रे उत्तरप्रदेशे ऐतिहासिकी सफलता प्राप्ता। योगीआदित्यनाथसर्वकारस्य नीतिगतनिष्ठा सक्रियपहलाश्च परिणामरूपेण अद्य उत्तरप्रदेशसंस्कृतसंस्थानं राष्ट्रीये मञ्चे विशेषं सम्मानं प्राप्तवद्भवति। दिल्ली विश्वविद्यालयस्य क्रीडापरिसरे संस्कृतभारती- दिल्ली च, केन्द्रीयसंस्कृतविश्वविद्यालयः च संयुक्तरूपेण आयोजितेषु १००८ संख्या- सामूहिक- संस्कृतसम्भाषणशिविरेषु समापनसमारम्भे अयं सम्मानः प्रदत्तः।

## योगिसर्वकारस्य नीतयः सम्मानस्य कारणम् अभवन्

उत्तरप्रदेशसर्वकारः संस्कृतभाषायाः प्रचारसंरक्षण-व्यवहारिकविस्तारान् प्रति ये योजनाः विगतवर्षेषु क्रियान्वितवती- यथा संस्कृतशिक्षकाणां नियुक्तिः, संवादात्मकप्रशिक्षणशिविराणाम् आयोजनम्, पाठ्यक्रमाणाम् आधुनिकीकरणं, संस्कृताय विशेषबजटव्यवस्था च तस्यैव परिणामस्वरूपेण अयं राष्ट्रियं सम्माननं प्राप्तम्। एषः पुरस्कारः केवलं संस्थानस्य न, अपि तु योगीसरकारस्य भाषानीतये अपि एकः राष्ट्रीयः अनुमोदनरूपः अस्ति।

## संस्कृतिनीतेः विजयः

उत्तरप्रदेशसंस्कृतसंस्थानस्य ओरतः समन्वयिका राधा शर्मा सम्मानं गृहीत्वा उक्तवती यत्- अयं सम्मानः योगीसरकारायाः मार्गदर्शने, समर्पणे, संस्कृतभाषायाः प्रति निष्ठायाः च प्रतिफलरूपेण प्राप्तः। एषः सम्पूर्णस्य प्रदेशस्य शिक्षासंस्कृतिनीतेः विजयः इति तया उक्तम्।

## प्रशिक्षकाणां महत्त्वपूर्णं योगदानम्

संस्थानस्य अनेके प्रशिक्षकाः अस्य अभियानस्य सफलतायै सक्रियं योगदानं दत्तवन्तः। तेषां प्रमुखानि नामानि अञ्जु मिश्रा, आस्था शुक्ला, दीपिका मिश्रा, डॉ. दिवाकर मिश्रः, डॉ. सत्यप्रकाश मिश्रः, गरुड मिश्रः, गीता वशिष्ठः, कीर्ति अत्रिः, खुशी शर्मा, नीतू सक्सेना, प्रियांका शुक्ला, शिवप्रताप मिश्रः, रजनीश तिवारी, रुद्रनारायण पाण्डेयः इत्यादयः।

## उत्तरप्रदेशः संस्कृतजागरणस्य पथप्रदर्शकः अभवत्

अस्मिन् भव्ये आयोजनसमारम्भे देशस्य विभिन्नप्रदेशेभ्यः आगताः संस्कृतप्रेमिणः, विद्वांसः, छात्राः, शिक्षकाः च सहभागीभूताः। प्रतिनिधिभिः अयं सम्मानः "उत्तरप्रदेशस्य कृते संस्कृतपुनर्जागरणस्य स्वर्णक्षणः" इति कथ्यते स्म, ते च भविष्ये अधिकेन समर्पणेन कार्यं करणीयमिति संकल्पं कृतवन्तः।
अस्य समारम्भस्य मुख्यातिथिः अभवत् भारतसर्वकारस्य गृहम्- सहकारिताराज्यमन्त्री माननीयः अमितशाहः। विशेषातिथिरूपेण दिल्लीराजधानीस्य मुख्यमन्त्री मान्या रेखा गुप्ता च, मुख्यवक्ता संस्कृतभारत्याः संगठनमन्त्री श्रीमान् जयप्रकाशश्च उपस्थिताः आसन्। अध्यक्षता डॉ. वागीश बी. जी., प्रान्ताध्यक्षः, संस्कृतभारती दिल्ली अकरोत्।

# लुधियाणा- दश-दिवसीय- संस्कृतसम्भाषण- शिबिरकार्यशालाया निष्पन्ना



**हिमसंस्कृतवार्ताः, अजयकुमार-आर्यः**

गुरु-हरगोबिन्द आयुर्वेदिकचिकित्सालयः चिकित्सकीयमहाविद्यालयश्च ( रायकोट-लुधियाना ) एवं संस्कृतभारती पञ्जाबप्रान्तः उभयोः संयुक्ततत्त्वाधाने आयोजितायाःदश-दिवसीय-संस्कृतसम्भाषण-कार्यशाला निष्पन्ना। समापनकार्यक्रमस्य शुभारम्भः दीपप्रज्वालनेन एवञ्च दीपमन्त्रेण जातम् । कार्यक्रमे छात्रछात्राभिः सरस्वतीवन्दना, सङ्कल्पः,गीतम्, अनुभवकथनम्, नाटकादि कार्यक्रमाः प्रस्तुताः। डॉ. राजकुमारेण आगतानाम् अतिथीनां परिचयं कारितम् । अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण श्रीमन् अजयकुमारआर्यः संस्कृतभारती, पञ्जाबप्रान्तमन्त्रीवर्यः आसीत् । महोदयेन 'आयुर्वेदिक पद्धत्यां वैद्यानां कृते संस्कृतं किमर्थम् आवश्यकम्' विषये निजविचाराः प्रस्तुताः। महोदयेन उक्तं यत् आयुर्वेदस्य मूलग्रन्थाः संस्कृत-भाषायां सन्ति, श्लोकानां अर्थं ज्ञातुं संस्कृतम् आवश्यकम् अस्ति । कार्यक्रमेऽस्मिन् डॉ. ओमनदीपमहोदयः मुख्यवक्ता रूपेण आसीत् । महोदयेन संस्कृतं किमर्थम् आवश्यकम् इत्यस्मिन् विषये उक्तम् । संस्कृतम् आयुर्वेदस्य मूलम् अस्ति तथा वयं संस्कृतं अग्रे नेतुं किं-किं कर्तुं शक्नुमः इत्यस्मिन् विषये निजविचाराः समुपस्थिताः । अस्मिन्नवसरे प्राचार्येन डॉ. तेजबीरेण आगतानाम् अतिथीनाम् उपहारेण स्वागतं कृतम् । तथा महोदयेन उक्तं यत् एतादृशानि शिबिराणि पुनः यदा समयः मेलिष्यति चेत् निश्चयेन चालिष्यामः। महाविद्यालयस्य प्रधानः डॉ. बच्चनलालबंसलमहोदयेन उक्तं यत् संस्कृतभाषा सरला तथा प्राचीना भाषा अस्ति। आयुर्वैदिक-छत्राणां कृते संस्कृतं बहु आवश्यकम् अस्ति। संस्कृतभारती तथा महविद्यालयस्य उभयोः पक्षतः छात्राणां कृते प्रमाणपत्राणि दत्तवन्तः । कार्यक्रमेऽस्मिन् ५६ प्रशिक्षुकाः भागं गृहीतवन्तः । अस्याः कार्यशालायाः संयोजकः डॉ. राजकुमारः आसीत् । कार्यक्रमेऽस्मिन् महाविद्यालयस्य उपप्रधानः डॉ. वरुण बंसलः, डॉ. राहुलः संस्कृतभारत्याः जिला-प्रशिक्षण-प्रमुखः, डॉ. शाही, डॉ. गीतिका बंसलः इत्यादयः समागताः आसन्।।

# ७ दिनाङ्के नागरिकरक्षाभ्यासं करिष्यन्ति राज्यानि

भारत-पाक-तनावयोर्मध्ये केन्द्रीयगृहमन्त्रालयेन महत् पदं स्वीकृत्य अनेकेषां राज्यानां नागरिकरक्षाभ्यासं कर्तुं निर्देशः दत्तः। सर्वकारीयसूत्रानुसारं एमएचए-द्वारा निर्गतनिर्देशे उक्तं यत् राज्यानि सुचारुनागरिकसुरक्षां सुनिश्चित्य मे ७ दिनाङ्के अभ्यासं करिष्यन्ति। अस्मिन् अभ्यासे वायु-आक्रमण-संचेतनायाः-सायरन-ध्वनिः भविष्यति, शत्रु-आक्रमणस्य सन्दर्भे कथं स्वस्य रक्षणं कर्तव्यम् इति विषये नागरिकाः छात्राः च प्रशिक्षिताः भविष्यन्ति।. अभ्यासस्य समये महत्त्वपूर्णसंयंत्राणां संस्थानां च शीघ्रं निगूढीकरणस्य च सज्जता अपि भविष्यति। राज्येभ्यः स्वनिष्कासनयोजनानि अद्यतनीकर्तुं पूर्वाभ्यासं च कर्तुं कथितं यत् आपत्काले शीघ्रं कार्यप्रक्रियां च कर्तुं शक्यते।

